# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – रामानुजवेदान्तः | **कोड – CE-1.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १२/१२/२०१६ | सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका (१-६ अवताराः) | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः उत्तरं लिखत।** ०८

(१) यतीन्द्रमतदीपिकायाः तत्कर्तुश्च सङ्क्षेपेण परिचयं लिखत।

(२) पञ्चविधस्य ईश्वरस्य समासतः वर्णनं कुरुत।

(३) ग्रन्थोक्तदिशा प्रमालक्षणं विशदयत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) प्रथमावतारदिशा प्रत्यक्षप्रमाणस्य सारांशं लिखत

(२) प्रत्यक्षस्य अवान्तरभेदान् प्रदर्श्य स्मृतेः प्रत्यक्षे अन्तर्भावं दर्शयत।

**प्रश्नः – ३ एकां टिप्पणीं लिखत।** ०२

(१) लक्षणस्य त्रयो दोषाः।

(२) करणम्।

**प्रश्नः – ४ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत** ०२

(१) पदार्थं कतिविधम्?

(२) "अर्चावतारः" इत्युक्ते किम्?

(३) जीवः कतिविधः? नामानि लिखत।

(४) प्रत्यक्षं कतिविधम्?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोरुत्तरं लिखत।** ०८

(१) व्याप्तिलक्षणं यथाग्रन्थं लिखत

(२) समग्रवेदस्य प्रामाण्यस्य यतीन्द्रमतदीपिकायाः आशयं प्रकटीकुरुत।

(३) अनुमानस्य अवयवपञ्चकस्य निरूपणं लिखत

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) उपमानप्रमाणस्य अनुमाने अन्तर्भावं प्रदर्शयत।

(२) हेत्वाभासस्य लक्षणं विलिख्य अनैकान्तिकहेत्वाभासस्य निरूपणं कुरुत

**प्रश्नः – ७ निम्नलिखितेषु द्वयोरुत्तरं दीयताम्** ०४

(१) विशिष्टाद्वैतपदस्य अर्थः।

(२) वेदाङ्गानि।

(३) पूर्वमीमांसा इति पदस्य अर्थः

**प्रश्नः – ८ अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) किं नाम व्याप्यम्?

(२) व्याप्तिः कतिविधा?

(३) अनुमानं कतिविधम्? किं तत्?

(४) यतीन्द्रमतदीपिकायाः कर्ता कः?

(५) उपाधिलक्षणं लिखत।

(६) हेत्वाभासाः कति? नामानि लिखत।

(७) सर्गादौ भगवान् कस्मै वेदम् उपदिशति?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्** ०८

(१) जम्बूद्वीपस्य वर्णनं यथाग्रन्थं कुरुत

(२) कालस्य सङ्क्षेपेण निरूपणं लिखत।

(३) श्रीभगवतः नित्यविभूतेः वर्णनं लिखत।

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) पञ्चीकरणप्रक्रिया।

(२) पञ्चमहाभूतानि।

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्।** ०४

(१) प्रमेयम्।

(२) प्रकृतिः।

(३) इन्द्रियलक्षणम्।

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) प्रमेयं कतिविधम्? नामानि लिखत।

(२) किं नाम उपादानम्?

(३) ज्ञानेन्द्रियं कतिविधम्? नामानि लिखत।

(४) ब्रह्मणः एकस्मिन् अह्नि कति मनवः भवन्ति?

(५) यतीन्द्रमतदीपिकायां कति अवताराः सन्ति?

(६) अहङ्कारः कस्मात् उत्पद्यते?

(७) जम्बूद्वीपं कतिवर्षयुक्तम्?

***

**Answer Key**

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ७** गुणाः - ७०

विषयः – रामानुजवेदान्तः **कोड – CE-1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – १२/१२/२०१६ सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका (१-६ अवताराः)

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – ३**
१. अव्याप्तिरतिव्याप्तिरसम्भवश्चेति।
२. साधकतमं करणम् ।अतिशयितं साधकं साधकतमम् ।

**प्रश्नः – ४**
१. द्विविधम् । प्रमाणप्रमेयभेदेन
२. श्रीरङ्गवेङ्कटादिमूर्तिविशेषः ।
३. जीवः त्रिविधः । बद्धमुक्तनित्यभेदात् ।
४. द्विविधम् – निर्विकल्पसविकल्पकभेदात् ।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५**

**प्रश्नः – ६**

**प्रश्नः – ७**
१. न द्वैतम् अद्वैतम् । विशिष्टञ्चेदमद्वैतम् विशिष्टाद्वैतम्
२. षड् वेदाङ्गानि ।
३. आराधनकर्मप्रतिपादिका पूर्वमीमासा ।

**प्रश्नः – ८**
१. अनधिकदेशकालनियतं व्याप्यम् ।
२. व्याप्तिः द्विविधा । अन्वयव्यतिरेकभेदात् ।
३. द्विविधम् । स्वार्थपरार्थभेदेन ।
४. श्रीनिवासाचार्यः।
५. साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः।
६. पञ्च । असिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्ययपदिष्टाभेदात् ।
७. चतुर्मुखाय ।

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९**

**प्रश्नः – १०**

**प्रश्नः – ११**
१. प्रकर्षेण मेयं प्रमेयम् ।
२. सत्त्वरजस्तमोरूपगुणत्रयाश्रयरूपा प्रकृतिः ।
३. सात्त्विकाहङ्कारोपादानकं द्रव्यम् इन्द्रियम् ।

**प्रश्नः – १२**
१. द्विविधम् । द्रव्याद्रव्यभेदात् ।
२. अवस्थाश्रयत्वम् उपादानम् ।
३. षड्विधम् । मनःश्रोत्रचक्षुर्घ्राणरसनात्वग्भेदात् ।
४. चतुर्दश
५. दश
६. महतः
७. नववर्षयुक्तम् ।